योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य पूर्वार्धम्)/सर्गः १०३

त्र्यधिकशततमः सर्गः १०३

श्रीवसिष्ठ उवाच ।

निर्विकल्पसमाधानात्काष्ठकुड्योपमस्थितिः ।

एवं शिखिध्वजो राजा चूडालामधुना श्रृणु ।। १

शिखिध्वजं तं भर्तारं कुम्भवेषेण तेन सा ।

प्रबोध्यान्तर्धिमागत्य ततार तरसा नभः ।। २

देवपुत्राकृतिं व्योम्नि जहौ मायाविनिर्मिताम् ।

विदग्धमुग्धमाकारं स्त्रैणं जग्राह सुन्दरम् ।। ३

नभसा स्वपुरं प्राप विवेशान्तःपुरं क्षणात् ।

दृश्या बभूव लोकस्य नृपकर्म चकार च ।। ४

वासरत्रितयेनाथ पुनरम्बरमेत्य सा ।

बभूव कुम्भो योगेन शिखिध्वजवनं ययौ ।। ५

तथा तत्रैव तं भूपमपश्यद्वनभूमिगा ।

निर्विकल्पसमाधिस्थं समुत्कीर्णमिव द्रुमम् ।। ६

अहो नु खलु भो दिष्ट्या विश्रान्तोऽयमिहात्मनि ।

स्थितः स्वस्थः समः शान्त इत्युवाच पुनःपुनः ।। ७

तदेनं तावदेतस्माद्बोधयामि परात्पदात् ।

इदानीमेव किं देहत्यागमेष करोति वै ।। ८

किंचित्कालं स्फुरत्वेष राज्येन विपिनेन वा ।

सममेव गमिष्यावस्त्यक्तदेहाविमौ समौ ।। ९

तस्योपदेशो विषमः परिणामं न गच्छति ।

अनेनाभ्यासयोगेन तावदाबोधयाम्यहम् ।। १०

इति संचिन्त्य चूडाला सिंहनादं चकार सा ।

भूयोभूयः प्रभोरग्रे वनेचरभयप्रदम् ।। ११

न चचाल शिलेवाद्रौ यदा नादेन तेन सः ।

भूयोभूयः कृतेनापि तदा सा तं व्यचालयत् ।। १२

चालितः पातितोऽप्येष यदा न बुबुधे नृपः ।

तदा संचिन्तयामास चूडाला कुम्भरूपिणी ।। १३

अहो परिणतः साधुः स्वपदे भगवानयम् ।

तदेनं हि कया युक्त्या सांप्रतं बोधयाम्यहम् ।। १४

अथवैनं महात्मानं किमर्थं बोधयाम्यहम् ।

विदेहं बोधमासाद्य तिष्ठत्वेष यथासुखम् ।। १५

अहमप्यंगनादेहमिमं त्यक्त्वा परं पदम् ।

अपुनर्जननायैव गच्छामीह हि किं समम् ।। १६

इति संचिन्त्य देहं स्वं त्यक्तुमभ्युद्यता सती ।

पुनः संचिन्तयामास चूडाला सा महामतिः ।। १७

आलोकयामि चैतावदेनं देहं महीपतेः ।

यद्यस्य सत्त्वशेषोऽस्ति बोधबीजं हृदन्तरे ।। १८

तत्कालेनैष भगवान्संप्रबोधमुपैष्यति ।

मूलकोशरसालीनं पुष्पजालमिव द्रुमे ।। १९

तदेवं विरहञ्जीवन्मुक्त एव भवत्यलम् ।

मुक्तो भवत्यथ यदि मन्ये गच्छामि तत्समम् ।। २०

इति संचिन्त्य चूडाला स्पर्शनेन नयेन च ।

पतिमालोक्य साशङ्कमुवाच वरवर्णिनी ।। २१

अस्त्येव सत्त्वशेषोऽस्य हृदि संबोधकारणम् ।

संबोधहेतूदयेन सत्त्वशेषं व्यबुध्यत ।। २२

श्रीराम उवाच ।

भृशं संशान्तचित्तस्य काष्ठलोष्टसमस्थितेः ।

सत्त्वशेषः कथं ब्रह्मन्ज्ञायते ध्यानशालिनः ।। २३

श्रीवसिष्ठ उवाच ।

प्रबोधकारणं यस्य दुर्लक्ष्याणुवपुर्हृदि ।

विद्यते सत्त्वशेषोऽन्तर्बीजे पुष्पफलं यथा ।। २४

चित्तस्पन्दवियुक्तस्य तस्यास्पन्दितसच्चितः ।

द्वित्वैकत्वविहीनस्य समस्याचलसंस्थितेः ।। २५

कायः समसमाभोगो न ग्लायति न हृष्यति ।

नास्तमेति न चोदेति सममेवावतिष्ठते ।। २६

द्वित्वैकत्वादियुक्तस्य यस्य प्रस्पन्दते मनः ।

तस्य देहोऽन्यतामेति नास्पन्दस्य कदाचन ।। २७

चित्तस्पन्दो हि सर्वेषां कारणं जगतः स्थितेः ।

राम भावविकाराणां कुसुमानां यथा मधुः ।। २८

अस्मिन्प्रयास्यतो देहे चेतसो हि मुहुर्मुहुः ।

हर्षः कोपो न संमोहो वशमेति रघूद्वह ।। २९

चित्ते प्रशममायाते कायो यः सत्त्ववर्जितः ।

बाधते नाम्बरस्येव तस्य भावविकारभूः ।। ३०

वीच्यादि न यथोदेति समाया जलसंततेः ।

तथा न दृश्यते दोषः समायाः सत्त्वसंततेः ।। ३१

सत्त्वस्यानुपलम्भोऽस्ति न तस्योपशमादृते ।

यावद्भाति समं तत्त्वं कालाच्छाम्यति केवलम् ।।३२

देहे यस्मिंस्तु नो चित्तं नापि सत्त्वं च विद्यते ।

स तापे हिमवद्राम पञ्चत्वेन विलीयते ।। ३३

शिखिध्वजस्य देहोऽसौ निश्चित्तस्तेजसोर्जितः ।

सत्त्वांशेन च संयुक्तस्तेन न ग्लानिभाजनम् ।। ३४

तं तथाभूतमालोक्य भर्तुर्देहं वराङ्गना ।

अनुज्झितवती देहं चिन्तयामास सत्वरम् ।। ३५

चित्तत्त्वं सर्वगं शुद्धं प्रविश्याबोधयाम्यहम् ।

भविष्यद्बोधनं कान्तमथ तत्र हि संस्थिता ।। ३६

न बोधयामि यद्येनं चिरात्तद्बुध्यते स्वयम् ।

किमेकैवावतिष्ठेऽहमित्येवं बोधयाम्यहम् ।। ३७

इति संचिन्त्य चूडाला देहं करणपञ्जरम् ।

संत्यज्य प्राप चित्तत्त्वे स्थितिमाद्यन्तवर्जिते ।। ३८

तत्र सा चेतनास्पन्दं कृत्वा सत्त्ववतः प्रभोः ।

स्वं विवेश पुनर्देहं स्वं नीडमिव पक्षिणी ।। ३९

कुम्भाकृतिरथोत्थाय निविष्टा कुसुमस्थले ।

साम गातुं प्रवृत्ता सा भ्रमरीवृन्दनिःस्वना ।। ४०

तं सामस्वनमाकर्ण्य चित्सत्त्वगुणशालिनी ।

बुबुधे भूपतेर्देहे वसन्त इव पद्मिनी ।। ४१

दृशं विकासयामास तां तदार्क इवाब्जिनीम् ।

गृहीतसत्त्वसंपत्तिः शिखिध्वजमहीपतिः ।। ४२

अपश्यत्कुम्भमग्रस्थं सामगायनतत्परम् ।

परेण वपुषा युक्तं सामवेदमिवापरम् ।। ४३

अहो बत वयं धन्याः पुनः प्राप्तो मुनिः स्वतः ।

इत्येवोदाहरव्राजा कुम्भाय कुसुमं ददौ ।। ४४

दिष्ट्योदिताः स्मो भगवंस्तव चेतसि पावने ।

के नाम वा महासत्त्वाः प्रसादेष्वङ्ग नो स्थिताः ।। ४५

अस्मत्पवित्रीकरणमेवागमनकारणम् ।

न चेत्किं चागमे ब्रूहि द्वितीयं कारणं भवेत् ।। ४६

कुम्भ उवाच ।

यतः प्रभृति यातोऽस्मि त्वत्सकाशादनिन्दितः ।

ततः प्रभृति चेतो मे त्वयैवेह समं स्थितम् ।। ४७

रम्ये स्वर्गे न तिष्ठामि समीपे तव सांप्रतम् ।

अभीष्टमुद्यदेवाङ्ग रम्याणां तत्पुरः स्थितम् ।। ४८

त्वादृशो बन्धुराप्तश्च सुहृन्मित्रं तथा सखा ।

विश्वास्यो वापि शिष्यश्च मन्ये जगति नास्ति मे ।। ४९

शिखिध्वज उवाच ।

अहो नु फलितं पुण्यपादपैर्नः कुलाचले ।

यस्माद्भवानसङ्गोऽपि वाञ्छत्यस्मत्समागमम् ।। ५०

इदं वनमिमे वृक्षा भृत्योऽयमहमादृतः ।

रोचते ते न चेतस्वर्गस्तदिह स्थीयतां प्रभो ।। ५१

भवद्वितीर्णया योगयुक्त्या विश्रान्तवानहम् ।

यथा साधो तथा मन्ये स्वर्गे विश्रमणं कुतः ।। ५२

तामेव संस्थितिं स्वच्छामवलम्ब्य प्रकाशिनीम् ।

विहरेह यथाकामं स्वर्गे भूमितले तथा ।। ५३

कुम्भ उवाच ।

परे पदे महानन्दे कच्चिद्विश्रान्तवानसि ।

इदं भेदमयं दुःखं कच्चित्संत्यक्तवानसि ।। ५४

कच्चिदापातरम्येभ्यः संकल्पेभ्यो रतिर्भृशम् ।

निर्मूलतां गता राजन्भोगनीरसमेव ते ।। ५५

हेयादेयदशातीतं शान्तं शमसमस्थिति ।

यथाप्राप्तेष्वनुद्वेगं कच्चित्तव मनःस्थितम् ।। ५६

शिखिध्वज उवाच ।

त्वत्प्रसादेन भगवन्दृष्टा दृश्यातिगा गतिः ।

प्राप्तः संसारसीमान्तो लब्धो लब्धव्यनिश्चयः ।। ५७

चिरादतिचिरेणैव विश्रान्तोऽस्मि निरामयः ।

लब्धं लव्धव्यमखिलं तृप्तः संश्चिरसंस्थितः ।। ५८

नोपदेष्टव्यमस्माकं किंचिदप्युपयुज्यते ।

सर्वत्रैवातितृप्तोऽस्मि संस्थितोऽस्मि गतज्वरः ।। ५९

ज्ञातमज्ञातमप्राप्तं त्यक्तं त्यक्तव्यमाश्रितम् ।

तत्त्वं परत्वं सत्त्वं मे स्वस्यैवास्ति न किंचन ।। ६०

निःसंसृतिर्विगतमोहभयो विरागो

नित्योदितः समसमाशयसर्वसौम्यः ।

सर्वात्मकः सकलसंकलनावियुक्त

आकाशकोशविशदः सममास्थितोऽस्मि ।। ६१

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मो० निर्वाणप्रकरणे पू० चू० कुम्भपुनरागमनं नाम त्र्यधिकशततमः सर्गः ।। १०३ ।।